M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref. / Ser. 37
Title: Shatpadartha Sangraha

	Shatpadārtha Sangraha	Title
	Prashnapāda	Author
		Editor
		Year, Vols.
		Publisher
37		Remarks

37

समवेतारंभकाः

ॐनमोगणेशायन अथगुणभाष्यं रूपादीनांसर्वेषांगुणानांगुणत्वाभिसंबंधोद्रव्याश्रयत्वंनिष्क्रियत्वंगुणवत्वंच रूपरस
गंधस्पर्शपरत्वगुरुत्वद्रवत्वस्नेहवेगामूर्तगुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दाअमूर्तगुणाः संख्या
परिमाणपृथक्त्वसंयोगविभागाउभयगुणाः संयोगविभागद्वित्वादिपृथक्त्वाद्योनेकाश्रिताः शेषास्त्वेकैकद्रव्यवृत्तयः
रूपरसगंधस्पर्श सांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दावैशेषिकगुणाः संख्यापरिमाणपृथक्त्वसंयोग
विभाग×स्पर्श॰ परत्वापरत्वनैमित्तिकद्रवत्वगुरुत्ववेगाःसामान्यगुणाः शब्दस्पर्शरूपरसगंधाबाह्यैकैकेंद्रियग्राह्याः
संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहवेगाःद्वींद्रियग्राह्याः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नास्त्वंतःकरणग्राह्याः गुरुत्वध
र्माधर्मभावनाह्यतींद्रियाः अपाकजरूपरसगंधस्पर्शपरिमाणैकत्वैकपृथक्त्वद्रवत्वगुरुत्वस्नेहवेगाःकारणगुणपूर्वकाः बुद्धिसुखदुः
खेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दाःअकारणगुणपूर्वकाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दतूलपरिमाणोत्तर
संयोगनैमित्तिकद्रवत्वपरत्वापरत्वपाकजाःसंयोगजाः संयोगविभागवेगाःकर्मजाः शब्दोत्तरविभागाविभागजौपरत्वापरत्वद्वित्वद्विपृ
थक्त्वादयोबुद्ध्यपेक्षाः रूपरसगंधानुष्णस्पर्शशब्दपरिमाणैकत्वैकपृथक्त्वस्नेहाःसमानजात्यारंभकाः सुखदुःखेच्छाद्वेषप्रयत्ना
स्त्वसमानजात्यारंभकाः संयोगविभागेतराःसंख्यागुरुत्वद्रवत्वोष्णस्पर्शज्ञानधर्माधर्मसंस्काराःसमानासमानजात्यारंभकाः
बुद्धिसुखदुःखेच्छाद्वेषभावनाशब्दाःस्वाश्रयसमवेतारंभकाः रूपरसगंधस्पर्शपरिमाणस्नेहप्रयत्नाःपरत्रारंभकाः संयोगविभागसं
ख्यैकपृथक्त्वगुरुत्वद्रवत्ववेगधर्माधर्मास्तूभयत्रारंभकाः गुरुत्वद्रवत्ववेगप्रयत्नधर्माधर्मसंयोगविशेषाःक्रियाहेतवः रूपरस
गंधानुष्णस्पर्शपरिमाणैकत्वैकपृथक्त्वस्नेहशब्दानामसमवायिकारणत्वं बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानांनिमि
त्तकं संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगानामुभयथाकारणत्वं परत्वापरत्वद्वित्वद्विपृथक्त्वादीनामकारणत्वं संयोगविभाग
शब्दात्मविशेषगुणानांप्रदेशवृत्तित्वं शेषाणामाश्रयव्यापित्वं अपाकजरूपरसगंधस्पर्शपरिमाणैकत्वैकपृथक्त्वगुरुत्व
सांसिद्धिकद्रवत्वस्नेहानांयावद्द्रव्यभावित्वं शेषाणामयावद्द्रव्यभावित्वं रूपादीनांसर्वेषांगुणानांप्रत्येकमपरसामान्यसंबं

गुण
ग्रन्थ
७

चाक्षुषग्राह्यसंज्ञाभवतीति तत्ररूपंचक्षुर्ग्राह्यं पृथिव्युदकज्वलनवृत्ति द्रव्याद्युपलंभकं लपनसहकारि शुक्लाद्यनेकप्रकारसलिलादिपरमाणुषु
नित्यंपार्थिवपरमाणुषु अग्निसंयोगविरोधिसर्वकार्यद्रव्येषुकारणगुणपूर्वकं आश्रयविनाशादेवविनश्यतीति रसोरसनाग्राह्यः पृथिव्युदक
वृत्ति जीवनपुष्टिबलारोग्यनिमित्तं रसनासहकारी मधुराम्ललवणकटुकषायतिक्तभेदभिन्नः अस्यापिनित्यानित्यनिष्पत्तयः पूर्वव
त् गंधोघ्राणग्राह्यः पृथ्वीवृत्तिः घ्राणसहकारी सुरभिरसुरभिश्च अस्यापिपूर्ववदुत्पत्त्यादयोव्याख्याताः स्पर्शस्त्वगिंद्रियग्राह्यः
पृथिव्युदकज्वलनपवनवृत्तिः त्वगिंद्रियसहकारीरूपानुविधायी शीतोष्णानुष्णाशीतभेदात्त्रिविधः अस्यापिनित्यानित्यनिष्पत्तयः पूर्व
वत् पार्थिवपरमाणुरूपादीनां पाकजोत्पत्तिविधानं घटादेरामद्रव्यस्याग्निनासंबद्धस्य अभिघातान्नोदनाद्वा तदारंभकेष्वणुषु
कर्माण्युत्पद्यंते तेभ्योविभागाद्विभागेभ्यः संयोगविनाशसंयोगविनाशेभ्यः कार्यद्रव्यंविनश्यतीति तस्मिन्विनष्टे परमाण्वग्निसंयोगादौष्ण्या
पेक्षाच्छ्यामादीनांविनाशः पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात्पाकजाजायंते तदनंतरंभोगिनामदृष्टापेक्षादात्माणुसंयोगादुत्प
न्नपाकजेष्वणुषु कर्मोत्पत्तौ तेषांपरस्परसंयोगाद्व्यणुकादिप्रक्रमेणकार्यद्रव्यमुत्पद्यते तत्रचकारणगुणप्रक्रमेण रूपाद्युत्पत्तिः नचका
र्यद्रव्यएवरूपादिविनाशोत्पत्तिः सतीव इति सचविपक्वस्तद्वदिशश्च वर्तमानत्वाग्निनाप्राप्त्यभावाभावात् अग्निप्रवेशादेवानिवृत्तमि
वहि कार्यद्रव्यविनाशादिति एकादिव्यवहारहेतुःसंख्या सापुनरेकद्रव्यानेकद्रव्याच तत्रैकद्रव्यायाः सलिलादिपरमाणुरूपादीनामिव
नित्यानित्यत्वनिष्पत्तयः अनेकद्रव्यातु द्वित्वादिकापरार्द्धांतेति तस्याः खल्वेकत्वेभ्योनेकविषयबुद्धिसहितेभ्योनिष्पत्तिः अपेक्षाबुद्धिवि
नाशाद्विनाशइति कथं बोद्धुश्चक्षुषासमानासमानजातीययोर्द्रव्ययोः सन्निकर्षेसति तत्संयुक्तसमवेतसमवायेन एकत्वसामान्यज्ञानात्
तो एकत्वसामान्यतत्संबंधतज्ज्ञानेभ्यः एकगुणयोरनेकविषयिण्येकाबुद्धिरुत्पद्यते तदनंतरमपेक्षांप्रत्याप्य स्वाश्रयाश्रयद्वित्वमारभ्यते
पुनस्तस्मिन् द्वित्वसामान्यज्ञानमुत्पद्यते तस्माद्द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनश्यत्ता द्वित्वसामान्यतत्संबंधतज्ज्ञानेभ्यो द्वित्वगुणबु
द्धेरुत्पद्यमानतेत्येकःकालः ततइदानीमपेक्षाबुद्धेर्विनाशाद्द्वित्वगुणस्यविनश्यत्ता द्रव्यज्ञानादिसंस्कारस्योत्पद्यमानतेत्येकःकालः तदनं
तरं द्वित्वगुणबुद्धेरि— त्याद्विगुणज्ञानात्सामान्यबुद्धिरपि द्विगुणज्ञानात्तत्संबंधपृथ्येद्द्रव्यमिति बुद्धेरुत्पद्यमानतेत्येकःकालः तदनं
तरं द्रव्यमिति ज्ञानोत्पादः द्वित्वस्यविनाशाद्गुणबुद्धेर्विनश्यत्ता द्रव्यबुद्धेरपिसंस्कारादिति एतेन त्रित्वाद्युत्पत्तिरपिव्याख्याता एकत्वे
भ्योनेकविषयबुद्धिसहितेभ्योनिष्पत्तिः अपेक्षाबुद्धिविनाशान्नाशइति क्वचिदाश्रयविनाशादपि कथं यदा एकत्वाधारावयवे

कर्मोत्पद्यतेतदाएकत्वसामान्यज्ञानमुत्पद्यते कर्मणावावयवांतराद्विभागः क्रियते अपेक्षाबुद्धेश्चोत्पत्तिः यस्मिन्नेवकाले विभागात्संयो
गनाशस्तस्मिन्नेवकाले द्वित्वमुत्पद्यते संयोगनाशाद्द्रव्यनाशः सामान्यबुद्धेश्चोत्पत्तिः ततोयस्मिन्नेवकाले सामान्यज्ञानादपेक्षाबुद्धि
नाशस्तस्मिन्नेवकालेआश्रयनाशाद्द्वित्वनाशः नशोभनमेतद्विधानं वध्यघातकपक्षेसदानवस्थानलक्षणेतुविरोधे द्रव्यज्ञानानुत्पत्तिरि
तिप्रसंगः कथं गुणबुद्धिसमकालमपेक्षाबुद्धिनाशाद्द्वित्वनाशेतदपेक्षस्य द्रव्ये इति ज्ञानस्याभावप्रसंगइति लैंगिकवत्ज्ञानमात्रादि
ति चेन्न स्यान्मतं यथानुमितं तत्तस्यसत्त्वलिंगाभावेपिज्ञानमात्रादनुमानं तथा गुणनाशेसत्यपिगुणबुद्धिमात्रात्तद्द्रव्ये इतिप्रत्ययःस्यादि
ति नविशेष्यज्ञानत्वात् नहिविशेष्यज्ञानं सारूप्यात्तद्विशेषणसंबंधमंतरेणभवितुमर्हतीति तथाचाहसूत्रकारः समवायिनःश्वैत्याच्छ्वैत्यबु
द्धेः श्वेतबुद्धिः तेकार्यकारणभूतेइति नतुलैंगिकज्ञानभेदेनोत्पद्यते किंतुसाध्यसाधनभेदेनतस्माद्विषमोयमुपन्यासः नाप्युत्पत्तेःय
था शब्दवदाकाशमितित्रीणिज्ञानानि युगपदुत्पद्यंते तथाद्वित्वज्ञानासत्त्वे अदोषः वध्यघातकपक्षेपिसमानोदोषइतिचेत् स्यान्मतं वध्य
घातकपक्षेपितर्हि द्रव्यज्ञानानुत्पत्तिप्रसंगः कथं द्वित्वसामान्यबुद्धिसमकालसंस्कारादपेक्षाबुद्धिनाशादिति तेनसमूहज्ञानस्यसंस्कारहेतुत्वा
त् समूहज्ञानमेवसंस्कारकारणं नालोचनज्ञानमित्यदोषः ज्ञानयौगपद्यप्रसंगइतिचेत् स्यान्मतं ननुज्ञानानांवध्यघातकपक्षेविरोधेज्ञाने
यौगपद्यप्रसंगात् अविनश्यदवस्थानप्रतिषेधात् ज्ञानयौगपद्यवचनेन युगपदुत्पत्तिर्विनश्यतोर्युगपदवस्थानं प्रतिषिध्यते नवध्यघातक
विरोधे ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानमस्तीति परिमाणंमानव्यवहारकारणं तच्चतुर्विधं अणुमहद्दीर्घह्रस्वंच तत्रम
हद्द्विविधं नित्यमनित्यंच नित्यमाकाशकालदिगात्मसु परममहत्त्वं अनित्यं त्र्यणुकादावेव तथाअणुत्वमपिद्विविधं नित्यंपरमाणुमनस्सुपारिमांड
ल्यं अनित्यं द्व्यणुकएव कुवलयामलकबिल्वादिषुमहत्स्वपि तत्प्रकर्षभावाभावमपेक्ष्यभाक्तोणुत्वव्यवहारः अनित्यंचतुर्विधमपिसं
ख्यापरिमाणप्रचययोनि तत्रेश्वरबुद्धिमपेक्ष्योत्पन्ना परमाणुद्व्यणुकेषु बहुत्वसंख्या तैरारब्धेकार्यद्रव्ये त्र्यणुकादिलक्षणे रूपाद्युत्पत्तिसम
कालं महत्त्वं दीर्घत्वंचकरोति× दीर्घत्वेकत्वे तुल्यायामहत्परिमाणेकार्थसमवेते समुदायिविशेषादिपरिणामे तत्प्रकर्षभावाभावमपेक्ष्यभाक्तो ह्रस्वत्वव्य
वहारः× द्विबहुभिर्महद्भिरारब्धेकार्यद्रव्येकारणमहत्त्वान्येवमहत्त्वमारभंते नबहुत्वं समानसंख्यैरारब्धेतिशयदर्शनात् प्रचयश्चतूलपिंडयोर्वर्त्त
मानः पिंडारंभकप्रशिथिलसंयोगापेक्षः इतरेतरपिंडावयवसंयोगापेक्षोवा द्वित्वके महत्त्वमारभते नबहुत्वमहत्त्वे समानसंख्यापरिमाणैरारब्धे तिरि

यदर्शनात् द्वित्वसंख्यावाणोर्वर्त्तमाना द्व्यणुकेषु अणुत्वमारभते महत्त्वं च त्र्यणुकादौ कारणबहुत्वसामान्यजातिप्रचयेभ्यो दीर्घत्वस्योत्पत्तिः अणुत्व
गु.भा. वद्द्व्यणुके द्वित्वसंख्यातो ह्रस्वत्वस्योत्पत्तिः अथ त्र्यणुकादिवर्त्तमानयोर्महत्त्वदीर्घत्वयोः परस्परतः को विशेषः द्व्यणुके चाणुत्वह्रस्वत्वयोरिति तत्रास्ति म
२ हत्त्वदीर्घत्वयोः परस्परतो विशेषः महत्सु दीर्घमानीयतां दीर्घेषु महदानीयतामिति व्यवहारदर्शनात् अणुत्वह्रस्वत्वयोः परस्परतो विशेषस्तद्दर्शिनां प्र
त्यक्षः पतच्चतुर्विधमपि साध्यमाधारविनाशादेव विनश्यतीति पृथक्त्वमपि व्यवहारकारणं तत्पुनरेकद्रव्यं चानेकद्रव्यं च तस्य च नित्यानित्यत्वनिष्पत्तयः संख्या
या व्याख्याताः एतावांस्तु विशेषः एकत्वादिवदेकपृथक्त्वस्यापरसामान्याभावः संख्यया तु विशिष्यते तत्तु द्विविधव्यवहारदर्शनादिति संयोगः संयुक्तप्र
त्ययनिमित्तं स च द्रव्यगुणकर्महेतुः द्रव्यारंभे निरपेक्षस्तथा भवतीति सापेक्षेभ्यो निरपेक्षेभ्यश्चेति वचनात् गुणकर्मारंभे तु सापेक्षः संयुक्तसमवाया
दग्नेर्वैशेषिकमिति वचनात् अथ कथंलक्षणः कतिविधश्चेति अप्राप्तयोः प्राप्तिः संयोगः स तु त्रिविधः अन्यतरकर्मज उभयकर्मजः संयोगजश्चेति
तत्रान्यतरकर्मजः क्रियावता निष्क्रियस्य यथा स्थाणोः श्येनेन विभूनां च मूर्त्तैरिति उभयकर्मजस्तु विरुद्धदिक्क्रिययोः संनिपातः यथा मल्लयोर्मेषयोर्वेति संयोग
जस्तूत्पन्नमात्रस्यैव चिरोत्पन्नस्य च निष्क्रियस्य कारणाकारणसंयोगादि अकारणे कारणाकारणसंयोगपूर्वकः कार्याकार्यगतः संयोगः स चैक
स्माद् द्वाभ्यां बहुभ्यश्च भवति एकस्मात्तावत् तन्तुवीरणसंयोगात् द्वितन्तुकवीरणसंयोगः द्वाभ्यां तन्त्वाकाशसंयोगाभ्याम् एको द्वितन्तुकाकाशसंयोगः
बहुभ्यश्च तन्तुतुरीसंयोगेभ्य एकः पटतुरीसंयोगः एकस्माच्च द्वयोरुत्पत्तिः कथं यदा पार्थिवपरमाणौ संयोगे सति अन्येन पार्थिवेन पार्थिवस्य
न्येन अन्येन वाप्यस्य युगपत्संयोगौ भवतः तदा ताभ्यां संयोगाभ्यां पार्थिवाप्यद्व्यणुके युगपदारभ्येते ततो यस्मिन्नेव काले द्व्यणुकयोः कारणप्र
क्रमेणोत्पत्तिः तस्मिन्नेव काले द्व्यणुकेतरकारणाकारणगतात्संयोगादितरेतरकार्याकार्यगतौ संयोगौ युगपदुत्पद्येते किं कारणं कार
णसंयोगिना हि कार्यमवश्यं संयुज्यते इति न्यायः अतः पार्थिवं द्व्यणुकं कारणसंयोगिना तेनाप्येन संयुज्यते आप्यमपि द्व्यणुकं पार्थिवेने
ति अतः कथं द्व्यणुकयोः इतरेतरकारणासंबद्धयोः परस्परतः संबंध इति तयोरपि योगजाभ्यां संयोगाभ्यां संबंध इति नातः संयोगोऽस्ति २
नित्यः पारिमाण्डल्यवत् पृथगनित्यत्वविधानात् यथा चतुर्विधं परिमाणमुत्पाद्यमुक्त्वाह नित्यं पारिमाण्डल्यमित्येवमन्यतरकर्मजा
दिसंयोगमुत्पाद्यमुक्त्वा पृथक् नित्यं ब्रूयात् नत्वेवमब्रवीत् अतः संयोगः परमाणूनाम् आकाशादिभिः प्रदेशवृत्तिः अन्यतरकर्मजः संयोग
इति विभूनां च परस्परतः संयोगो नास्ति युतसिद्ध्यभावात् स पुनः द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं युताश्रयाश्रयित्वं चेति विनाशस्तु
सर्वस्य संयोगस्य एकार्थसमवेताद्विभागात् क्वचिच्चाश्रयनाशान्नाशः कथं यदा तन्त्वोः संयोगे सति अन्यतरतन्त्वारंभकांशौ कर्मोद्यु

तेनेन कर्मणा अंश्वन्तराद्विभागः क्रियते विभागाच्च तंत्वारंभकसंयोगनाशः तद्विनाशात्तंतोर्विनाशः तद्विनाशे तदाश्रितस्य संयोगस्याव
श्यं विनाशः विभागो विभक्तप्रत्ययनिमित्तं शब्दविभागहेतुश्च प्राप्तिपूर्विकाप्राप्तिर्विभागः स च त्रिविध एव अन्यतरकर्मज उभय
कर्मजो विभागजश्च तत्रान्यतरकर्मजः उभयकर्मजश्च संयोगवत् विभागजस्तु द्विविधः कारणविभागात् कारणाकारणविभागाच्च कार
णविभागात्तावत् कार्याविष्टे कारणे कर्मोत्पन्नं यदा अवयवान्तराद्विभागं करोति न तदा आकाशादिदेशाद्विभागं करोति न तदा अवयवान्तराद्
तिष्ठति अतो वयवकर्म अवयवान्तरादेव विभागमारभते विभागाच्च आरंभकसंयोगनाशः तस्मिन्विनष्टे कारणाभावात्का
र्याभावः अवयविविनाशः तदा कारणयोर्वर्तमानो विभागः कार्यविनाशविशिष्टं कालं स्वतंत्रं वा अवयवमपेक्ष्य सक्रियस्यैवावयवस्य कार्यसं
युक्तादाकाशादिदेशाद्विभागमारभते न तु निष्क्रियस्य कारणाभावात् उत्तरसंयोगानुत्पत्तौ अनुपभोग्यत्वप्रसंगः नन्वतद्वयवकर्मा
काशादिदेशाद्विभागमारभते तदारंभकालस्यातीतत्वात् प्रदेशान्तरसंयोगं तु करोत्येव अकृतसंयोगस्य कर्मणः कालात्ययाभावादि
ति किं कारणाकारणविभागादपि कथं यदा हस्ते कर्मोत्पन्नम् अवयवान्तराद्विभागमकुर्वत् आकाशादिदेशाद्विभागानारभ्य प्रदेशान्तरे
संयोगानारभते तदा अनेककारणाकारणविभागाः कर्मणो दिशं दिशं प्रति कार्यारंभाभिमुखं तानपेक्ष्य कार्याकार्यविभागानारभ
ते तदनंतरं कारणाकारणसंयोगाश्च कार्याकार्यसंयोगमिति यदि कारणविभागानंतरं कार्यविभागोत्पत्तिः कारणसंयोगानंतरं का
र्यसंयोगोत्पत्तिः नन्वेवं तर्हि अवयवावयविनाम् अयुतसिद्धिदोषप्रसंग इति न युतसिद्ध्यपरिज्ञानात् सा पुनर्द्वयोरन्यतरस्य वा पृथग्ग
तिमत्त्वमिति इयं तु युतसिद्धिर्नित्यानाम् अनित्यानां तु युतेष्वाश्रयेषु सम ×सं× वायो युतसिद्धिः त्वगिन्द्रियशरीरयोः पृथग्गतिमत्त्वं नास्ति युतेष्वाश्र
येषु समवायोऽस्तीति परस्परेण संयोगसिद्धिः -- काशयोस्त्वाश्रयान्तराभावेऽप्यन्यतरस्य पृथग्गतिमत्त्वात् संयोगविभागौ सिद्धौ तंतुपटयोरनित्य
योः पृथगाश्रयान्तराभावात्परस्परतः संयोगविभागाभावः दिगादीनां तु पृथग्गतिमत्त्वं नास्तीति परस्परेण संयोगविभागाभाव इति विना
शस्तु -- स्वविभागस्य उत्तरसंयोगावधिसद्भावात् क्षणिकत्वादिति न तस्य संयोगवद्द्वयोरेव विभागस्तयोरेव संयोगाद्विनाशो भवति कस्मात्
संयुक्तप्रत्ययवत् विभक्तप्रत्ययानुवृत्त्यभावात् तस्मादुत्तरसंयोगावधिसद्भावात् क्षणिक इति क्वचिच्चाश्रयविनाशाद्विनश्यति
कथं यदा द्वितन्तुककारणावयवांशौ कर्मोत्पन्नं अंश्वन्तराद्विभागमारभते तदैव तन्त्वन्तरे नोत्पद्यते विभागाच्च तन्त्वारंभकसंयोगनाशः ततस्त
रकर्मणा च तंत्वन्तराद्विभागः क्रियते इत्येकः कालः ततो यस्मिन्नेव काले तन्त्वन्तरसंयोगनाशस्तस्मिन्नेव काले संयोगनाशात्तंतुनाशः तस्मि

गु.भा. म्भेतदाश्रितस्यतंत्वंतरविभागस्यनाशइति एवंतर्हि विभागजविभागानुत्पत्तिप्रसंगः कारणविभागाभावात् ततश्चप्रदेशांतरस्यसंयोगाभावइत्यतो
विरोधिगुणांतराभावात्कर्मणाचिरकालावस्थायित्वं नित्यद्रव्यसमवेतस्यचनित्यत्वमितिदोषः कथं यदाद्व्यणुकारंभकपरमाणौ कर्मोत्पन्नमण्वं
२ तरविभागंकरोति तदैवाण्वंतरे कर्मोत्पद्यते अतोयस्मिन्नेवकाले विभागाद्द्व्यणुकारंभकसंयोगनाशस्तदैवतुकर्मणा द्व्यणुकाणोर्विभागस्ततोयस्मि
न्नेवकालेऽणुद्व्यणुकविभागः द्व्यणुकाणुसंयोगनाशस्तस्मिन्नेवकाले संयोगनाशाद्द्व्यणुकनाशस्तस्मिन्नेवतदाश्रितस्यद्व्यणुकाणुविभाग
स्यनाशः तस्माद्विरोधिगुणसद्भावात्कर्मणोनियम तदनंतरविभागाद्विभागइतिदोषः आश्रयनाशात्तच्चान्यविभागान्नैतनंतरविभागद्वय
तस्माद्वतरोविभागःस्मर्यते अंगुल्याकाशविभागाच्छरीराकाशविभागवदिति नमलतस्मिन्नुत्पन्ने कसंयोगंकृत्वाविनश्यतीत्यदोषः अथवा अं
श्वंतरविभागोत्पत्तिसमकाले तस्मिन्नेवतंतौ कर्मोत्पद्यते ततोविभागः तंत्वारंभकसंयोगनाशः तेनकर्मणाचविभागः क्रियतइत्येकःका
लः ततःसंयोगनाशात्तंतुनाशः तन्नाशाच्चतदाश्रितयोर्विभागकर्मणोर्युगपन्नाशइति तंतुवीरणयोर्वासंयोगेसति द्रव्यानुत्पत्तौ पूर्वोक्तेनवि
धानेनआश्रयनाशःसंयोगाभ्यां तंतुवीरणयोर्विभागस्यनाशइति परत्वमपरत्वंचपरापराभिधानप्रत्ययनिमित्तं तच्चद्विविधं दिक्कृतंकालकृतंच
दिक्कृतं दिग्विशेषप्रत्यायकं कालकृतंतुवयोभेदप्रत्यायकं तत्रदिक्कृतस्योत्पत्तिरभिधीयते कथं एकस्यांदिश्यवस्थितयोःपिंडयोःसंयुक्तसं
योगबहुत्वेसति एकस्यद्रष्टुःसन्निकृष्टमवधिंकृत्वा एतस्माद्विप्रकृष्टोयमितिपरत्वाधारेबुद्धिरुत्पद्यते तामपेक्ष्यपरेणदिक्प्रदेशेनसं
योगा[illegible]त्पत्तिः विप्रकृष्टंचावधिंकृत्वा एतस्मात्सन्निकृष्टोयमित्यपरत्वाधारेबुद्धिरुत्पद्यते ततस्तामपेक्ष्यपरेणादिक्प्रदेशेनसंयोगत्वस्यो
त्प ×परत्वस्यो+त्तिः कालकृतयोरपिकथं वर्तमानयोरनियतदिग्देशसंयुक्तयोर्युवस्थविरयोः रूढश्मश्रुवलिपलितादिसांनिध्येस
तिएकस्यद्रष्टुर्युवानमवधिंकृत्वास्थविरे विप्रकृष्टबुद्धिरुत्पद्यते तामपेक्ष्यपरेणकालप्रदेशेनसंयोगात्परत्वस्योत्पत्तिः स्थविरंचावधिं
कृत्वायूनिसन्निकृष्टबुद्धिरुत्पद्यते तामपेक्ष्यापरेणकालप्रदेशेनसंयोगादपरत्वस्योत्पत्तिः नाशस्त्वपेक्षाबुद्धिसंयोगद्रव्यनाशात् अपेक्षा
बुद्धिनाशात्तावत् उत्पन्नेपरत्वे यस्मिन्काले सामान्यबुद्धिरुत्पन्ना भवतितदनंतर अपेक्षाबुद्धिर्विनश्यति सामान्यज्ञानतत्संबंधीयःपरत्वगुणबु २
द्धिरुत्पद्यमानता इत्येकःकालः ततोपेक्षाबुद्धेर्विनाशोगुणबुद्धेश्चोत्पत्तिः ततोपेक्षाबुद्धेर्विनाशाद्गुणस्यविनश्यता गुणज्ञानतत्संबंधोपि द्र
व्यबुद्धिरुत्पद्यमाना इत्येकःकालः ततोद्रव्यबुद्धेरुत्पत्तिर्गुणस्यनाशइति संयोगनाशादपिकथं अपेक्षाबुद्धिसमकालमेवपरत्वाधारेकर्मो
त्पद्यते तेनकर्मणादिक्पिंडविभागः परत्वस्योत्पत्तिरित्येकःकालः ततः सामान्यबुद्धेरुत्पत्तिः दिक्पिंडसंयोगविनाशः ततोयस्मिन्नेवका

लेगुणबुद्धिरुत्पद्यते तस्मिन्नेवकाले दिक्पिंडसंयोगनाशाद्गुणनाशः द्रव्यविनाशादपिकथं परत्वाधारावयवे कर्मोत्पन्नं यस्मिन्नेवकालेऽवयवांतरं
गंकरोति तस्मिन्नेवकालेऽपेक्षाबुद्धिरुत्पद्यते ततोयस्मिन् काले संयोगनाशस्तस्मिन्नेवकाले परत्वमुत्पद्यते ततः संयोगविनाशाद्द्रव्यनाशस्तद्वि
नाशात्तदाश्रितस्यगुणस्यविनाशः द्रव्यापेक्षाबुद्ध्योर्युगपद्विनाशात् अपिकथं यदापरत्वाधारावयवे कर्मोत्पद्यते तदैवापेक्षाबुद्धिरुत्पद्यते कर्मणा
चावयवांतराद्विभागः क्रियते परत्वस्योत्पत्तिरित्येकःकालः ततोयस्मिन्नेवकाले विभागात्संयोगनाशस्तस्मिन्नेवकाले सामान्यबुद्धिरुत्पद्य
ते तदनंतरसंयोगनाशाद्द्रव्यनाशः सामान्यबुद्धेश्चापेक्षाबुद्धेर्विनाशइत्येकःकालः ततोद्रव्यापेक्षाबुद्ध्योर्विनाशात्परत्वस्यविनाशः द्रव्यसंयोगवि
नाशादपि कथंयदापरत्वाधारावयवे कर्मोत्पद्यते अवयवांतराद्विभागंकरोति तस्मिन्नेवकाले पिंडकर्मापेक्षाबुद्ध्योर्युगपदुत्पत्तिः ततोयस्मिन्नेवकाले पर
त्वस्योत्पत्तिस्तस्मिन्नेवकाले विभागाद्द्रव्यारंभकसंयोगनाशः पिंडकर्मणाचादिक्पिंडविभागः क्रियते ततोयस्मिन्नेवकाले सामान्यबुद्धिरुत्पद्यते तत्समका
लंसंयोगविनाशात्पिंडनाशः विभागाच्चदिक्पिंडसंयोगविनाशस्ततोगुणबुद्धिसमकालं पिंडसंयोगयोर्विनाशात्परत्वस्यविनाशः संयोगापेक्षा
बुद्ध्योर्युगपद्विनाशा×वि+दपिकथं यदापरत्वं उत्पद्यते तदैवपरत्वाधारे कर्म ततोयस्मिन्नेवकाले परत्वसामान्यबुद्धिरुत्पद्यते तस्मिन्नेवकाले पिंडकर्म
दिक्पिंडविभागः क्रियते ततःसामान्यबुद्धितः अपेक्षाबुद्धिनाशः विभागाच्चदिक्पिंडसंयोगनाशइत्येकःकालः ततःसंयोगापेक्षाबुद्धिविनाशात्पर
त्वस्यनाशः त्रयाणांसमवाय्यसमवायिनिमित्तानां युगपद्विनाशइत्येकःकालः ततः संयोगापेक्षाबुद्धिविनाशात्परत्वस्यनाशः त्रयाणांसमवा
य्यसमवायिनिमित्तानां युगपद्विनाशादपिकथं यदापेक्षाबुद्धिरुत्पद्यते तदैवपिंडावयवकर्म ततोयस्मिन्नेवकालेऽवयवांतराद्विभागः क्रिय
ते परत्वस्योत्पत्तिस्तस्मिन्नेवकाले पिंडकर्म ततः संयोगविनाशात्पिंडकर्म ततोविभागात्पिंडारंभकसंयोगविनाशः पिंडकर्मणाचादिक्पिं
डविभागः क्रियते सामान्यबुद्धेरुत्पत्तिरित्येकःकालः ततः संयोगविनाशात्पिंडविनाशः विभागाच्चदिक्पिंडसंयोगविनाशः सामान्यज्ञाना
दपेक्षाबुद्धेर्विनाशइत्येतत्सर्वं युगपत्त्रयाणांसमवाय्यसमवायिनिमित्तानांविनाशात्परत्वस्यविनाशइति बुद्धिरुपलब्धिर्ज्ञानंप्रत्ययइति
पर्यायाः साचअनेकप्रकारार्थानुसादात्प्रत्यर्थनियतत्वाच्च तस्याःसत्यपिअनेकविधत्वेसमासतोद्विविधा विद्याऽविद्याच तत्राविद्याचतुर्विधा
संशयविपर्ययानध्यवसायस्वप्नलक्षणा संशयस्तावत्प्रसिद्धानेकविशेषयोःसादृश्यमात्रदर्शनात् उभयविशेषानुस्मरणाद्धर्माच्च किंस्वि
त उभयावलंबीविपर्ययसंशयः सचद्विविधोंतर्बहिश्च आप्तस्तावदादेशकस्यसम्यक्मिथ्यावादितिपुनरादेशात्त्रिषुकालेषुसंशयोभवति किंनुसम्य
कमिथ्यावेति बहिरपिद्विविधः प्रत्यक्षविषयेवाऽप्रत्यक्षविषयेचेति तत्राप्रत्यक्षविषयेतावत् साधारणलिंगदर्शनादुभयविशेषानुस्मरणाद्धर्माच्च
संशयोभवति यथाटव्यांविषाणमात्रदर्शनाद्गौर्गवयोवेति प्रत्यक्षविषयेपि स्थाणुपुरुषयोरूर्ध्वतामात्रदर्शनात् वक्रादिविशेषानुपलब्धितः स्था

गु.भा. णुत्वादिसामान्यविशेषानभिव्यक्तौ उभयविशेषानुस्मरणादुभयत आकृष्यमाणस्यात्मनः प्रत्ययो दोलायते किंनु खल्वयं स्थाणुः पुरुषो वेति विपर्य
योऽपि प्रत्यक्षानुमानविषय एव भवति प्रत्यक्षविषये तावत् प्रसिद्धानेकविशेषयोः पित्तकफानिलोपहतेंद्रियस्य अयथार्थालोचनादसंनिहितवि
४ षयविज्ञानजसंस्कारापेक्षादात्ममनसोः संयोगादधर्माच्च तस्मिन्नतदिति प्रत्ययो विपर्ययः यथा गव्येवाश्व इति असत्यपि प्रत्यक्षे प्रत्यक्षाभिमानो भव-
ति यथापगतघनपटलममलं जलनिधिसदृशवपुरंबरमनंतपुनरथामशार्वरं तम इति अनुमानविषयेऽपि बाष्पादिभिर्धूमाभिमतैर्वह्न्यनुमानं
गवयविषाणदर्शनाच्च गोविषाणदर्शनविपरीतेषु शाक्यादिदर्शनेष्विदं श्रेय इति मिथ्याप्रत्ययः विपर्ययः शरीरेंद्रियमनःस्वात्माभिमानः कृतकेषु नित्यदर्शनं
कारणवैकल्ये कार्योत्पत्तिज्ञानं हितमुपदिशत्स्वहितमिति अहितमुपदिशत्सु हितमिति अनध्यवसायोऽपि प्रत्यक्षानुमानविषय एव संजायते
तत्र प्रत्यक्षविषये तावत् प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा व्यासंगादर्थित्वाद्वा किमित्यालोचनमात्रमनध्यवसायः यथा वाहीकस्य पनसादिषु अनध्यवसायो भव
ति तत्र हि सत्ताद्रव्यत्वपृथिवीत्ववृक्षत्वरूपवत्त्वादिशाखाद्यपेक्षोऽध्यवसाय एव पनसत्वमपि पनसेष्वनुवृत्तमाम्रादिभ्यो व्यावृत्तं प्रत्यक्षमेव केवलं न
तूपदेशाभावाद्विशेषसंज्ञाप्रतिपत्तिर्न भवति अनुमानविषयेऽपि नारिकेलद्वीपवासिनः सास्नामात्रदर्शनात् कोऽर्थः खल्वयं प्राणी स्यादित्यनध्य
वसायो भवति उपरतेंद्रियग्रामस्य प्रलीनमनस्कस्येंद्रियद्वारेणैव यदनुभवनं / द्वीपवासिनः × मानसं तत्स्वप्नज्ञानं कथं यदा बुद्धिपूर्वकादात्मनः
शरीरव्यापारादहनि खिन्नस्य प्राणिनो निशि ---- परिणामार्थं वा अदृष्टकारितप्रयत्नापेक्षादात्मांतःकरणसंबंधान्मनसि क्रियाप्रबंधा
दंतर्हृदये निरिंद्रियात्मप्रदेशे निश्चलं मनस्तिष्ठति तदा प्रलीनमनस्क इत्याख्यायते तस्मिन्नुपरतेंद्रियग्रामे भवति तस्यामवस्थायां प्रबंधेन प्राणापानसंतान
प्रवृत्तौ आत्ममनःसंयोगविशेषात् स्वापाख्यात् संस्काराच्चेंद्रियद्वारेणैवासत्स्वेव विषयेषु प्रत्यक्षाकारं स्वप्नज्ञानमुत्पद्यते तत्तु त्रिविधं संस्कारपाटवाद्धातुदो
षाददृष्टाच्च तत्र संस्कारपाटवात् कामी क्रुद्धो वा यदा यमर्थमादृतश्चिंतयन् स्वपिति तदा सैव चिंतासंततिः प्रत्यक्षाकारा संजायते धातुदोषात्
वातप्रकृतिर्वातदूषितो वा आकाशगमनादीनि पश्यति पित्तप्रकृतिः पित्तदूषितो वा अग्निप्रवेशकनकपर्वतादीनि पश्यति श्लेष्मप्रकृतिः श्लेष्म
दूषितो वा सरित्समुद्रप्रतरणहिमगिरिप्रभृतीनि पश्यति यत्स्वयमनुभूतेष्वननुभूतेषु प्रसिद्धेष्वप्रसिद्धेषु शुभावेदकं गजारोहणछ
त्रलाभादि तत्सर्वं संस्कारधर्माभ्यां भवति तद्विपरीतं तु तैलाभ्यंजनखरोष्ट्रारोहणादि तत्सर्वमधर्मसंस्काराभ्यां भवति अत्यंताप्रसिद्धेष्वदृष्टादेव भवति ४
स्वप्नांतिकं यद्यप्युपरतेंद्रियग्रामस्य भवति तथाप्यतीतज्ञानप्रबंधप्रत्यवेक्षणात् स्मृतिरेवेति चतुर्विधाऽविद्येति विद्यापि चतुर्वि
धा प्रत्यक्षलैंगिकस्मृत्यार्षलक्षणा तत्राक्षमक्षं प्रतीत्य उत्पद्यते तत्प्रत्यक्षं अक्षाणींद्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्र

मनांसि तद्धि द्रव्यादिपदार्थेषूत्पद्यते द्रव्यं तावत्त्रिविधं पृथिव्युदकज्वलनादि महत्त्वानेकद्रव्यवत्त्वोद्भूतरूपप्रकाशचतुष्टयसंनिकर्षाद्धर्मादिसा
मग्र्ये च सति स्वरूपालोचनमात्रं प्रत्यक्षं सामान्यविशेषद्रव्यगुणकर्मविशेषणापेक्षादात्ममनःसंनिकर्षात् प्रत्यक्षमुत्पद्यते सद्द्रव्यं पृथिवी
विषाणी शुक्लो गौर्गच्छतीति रूपरसगंधस्पर्शेष्वनेकद्रव्यसमवायात् स्वगतविशेषात् स्वाश्रयसंनिकर्षात् नियतेंद्रियनिमित्त
ज्ञानमुत्पद्यते शब्दस्य त्रितयसंनिकर्षाच्छ्रोत्रसमवेतस्य तेनैवोपलब्धिः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहवेग
द्रवत्वकर्मणां प्रत्यक्षद्रव्यसमवायाच्चक्षुःस्पर्शनाभ्यां ग्रहणं बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां द्वयोरात्ममनसोः संनिक
र्षादुपलब्धिः सत्तावत् द्रव्यत्वगुणत्वकर्मत्वादीनां उपलभ्याधारसमवेतानां आश्रयग्राहकैरिंद्रियैर्ग्रहणमित्येतदस्मदादीनां प्रत्यक्षमस्म
द्विशिष्टानां तु योगिनां युक्तानां योगजधर्मानुगृहीतेन मनसा स्वात्मांतराकाशदिक्कालवायुपरमाणुमनस्सु तत्समवेतेषु गुणकर्मसा
मान्यविशेषेषु समवाये चावितथं स्वरूपदर्शनमुत्पद्यते वियुक्तानां पुनश्चतुष्टयसंनिकर्षाद्योगजधर्मानुग्रहसामर्थ्यात् सूक्ष्मव्यवहितविप्र
कृष्टेषु अर्थेषु प्रत्यक्षमुत्पद्यते ज्ञानं तत्र सामान्यविशेषेषु स्वरूपालोचनमात्रं प्रत्यक्षं प्रमाणं प्रमेया द्रव्यादयः पदार्थाः प्रमाता आत्मा प्रमि
तिर्द्रव्यादिविषयं ज्ञानं सामान्यविशेषज्ञानोत्पत्तौ अविभक्तमालोचनमात्रं प्रत्यक्षं प्रमाणं न चात्रान्यत् प्रमाणांतरमस्ति अफलरूपत्वात्
अथवा सर्वेषु पदार्थेषु चतुष्टयसंनिकर्षादवितथमव्यपदेश्यं यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षं प्रमाणं प्रमेया द्रव्यादयः पदार्थाः प्रमाता आत्मा
प्रमितिर्गुणदोषमाध्यस्थ्यदर्शनमिति लिंगदर्शनात् संजायमानं लैंगिकं लिंगं पुनः यदनुमेयेन संबद्धं प्रसिद्धं च तदन्विते तदभावे च नास्त्येव
तल्लिंगमनुमापकं विपरीतमतो यत्स्यादेकेन द्वितयेन वा विरुद्धासिद्धसंदिग्धमलिंगं काश्यपोऽब्रवीत् यदनुमेयेनार्थेन देशविशेषे का
लविशेषे वा सहचरितमनुमेयधर्मान्विते चान्यत्र सर्वस्मिन्नेकदेशे वा प्रसिद्धं अनुमेयविपरीते च सर्वस्मिन् प्रमाणतोऽसदेव तदप्र
सिद्धस्यार्थस्यानुमापकं लिंगं भवति यत्तु यथोक्तात् त्रिरूपाल्लिंगादेकेन धर्मेण द्वाभ्यां वा विपरीतं तदनुमेयस्याधिगमे लिंगं न भवतीत्याह सू
त्रकारः अप्रसिद्धोऽनपदेशोऽसन्संदिग्धश्चानपदेश इति विधिस्तु यत्र धूमस्तत्राग्निरिति अग्न्यभावे धूमो न भवतीति एवं प्रसिद्धसमय
स्यासंदिग्धधूमदर्शनात् साहचर्यानुस्मरणात्तदनंतरं अग्न्यध्यवसायो भवतीति तत्परतद्भवतीति एवं सर्वत्र देशकालाविनाभूतमितरस्य लिं
गं शास्त्रे कार्यादिग्रहणं निदर्शनार्थं कृतं नावधारणार्थं कस्माद्व्यतिरेकदर्शनात् तद्यथा अध्वर्युः ओंश्रावयन् व्यवहितस्य होतुर्लिंगं

प्र.भा. द्रोदयः समुद्रवृद्धेः कुमुदविकाशस्य च शरदि जलप्रसादस्यागस्त्योदय इत्येवमादि तत्सर्वं अस्येदमिति संबंधमात्रवचनात्सिद्धं तत्तु द्विविधं दृष्टं सामान्यतो
दृष्टं च तत्र दृष्टं प्रसिद्धसाध्ययोरत्यन्तजात्यभेदेऽनुमानं यथा गव्येव सास्नामात्रमुपलभ्य देशान्तरेऽपि सास्नामात्रदर्शनाद्गवि प्रतिपत्तिर्भवति प्रसिद्धसाध्य
योरत्यन्तजातिभेदे लिङ्गानुमेयधर्मसामान्यानुवृत्तितोऽनुमानं सामान्यतो दृष्टं यथा कर्षकवणिग्राजपुरुषाणां प्रवृत्तेः फलवत्त्वमुपलभ्य वर्णाश्रमिणा
५ मपि दृष्टं प्रयोजनमनुद्दिश्य प्रवर्तमानानां फलानुमानमिति तत्र लिङ्गदर्शनं प्रमाणं प्रमितिरग्निज्ञानं अथवा अग्निज्ञानमेव प्रमाणं प्रमितिः एतेन
पादोपस्यानुध्येयपदर्शनं एतत्स्वनिश्चितार्थमनुमानं शब्दादीनामप्यनुमानेऽन्तर्भावः समानविधित्वात् यथा प्रसिद्धसमयस्य लिङ्गदर्शनप्रसिद्ध्य
नुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानं एवं शब्दादिभ्योऽपीति श्रुतिस्मृतिलक्षणोऽप्याम्नायो वक्तृप्रामाण्यापेक्षः तद्वचनादाम्नायप्रामाण्यं लिङ्गाच्चानि
त्यः बुद्धिपूर्वा वाक्यकृतिर्वेदे ददातिरित्युक्तत्वात् प्रसिद्धाभिनयस्य चेष्टया प्रतिपत्तिदर्शनात्तदप्यनुमानमेव आप्तेनाप्रसिद्धगवयस्य गवा गवय प्र
तिपादनादुपमानमाप्तवचनमेव दर्शनार्थापत्तिर्विरोध्येव श्रवणादनुमितानुमानं संभवोऽप्यविनाभावित्वादनुमानमेव अभावोऽप्यनुमान
मेव यथोत्पन्नं कार्यं कारणसद्भावे लिङ्गमेवमनुत्पन्नं कार्यं कारणासद्भावे लिङ्गं तथैति -- ऐतिह्यमप्याप्तोपदेश एवेति पञ्चावयवेन वाक्येन स्वनिश्चितार्थप्रतिपाद
नं परार्थानुमानं पञ्चावयवेनैव वाक्येन संशयितविपर्यस्ताव्युत्पन्नानां अनिश्चितार्थप्रतिपादनं परार्थानुमानं विज्ञेयं अवयवाः पुनः प्रतिज्ञापदेश
निदर्शनानुसंधानप्रत्याम्नायाः तत्रानुमेयोद्देशोऽविरोधी प्रतिज्ञा प्रतिपिपादयिषितधर्मविशिष्टस्य धर्मिणोऽपदेशविषयापादनार्थमुद्दे
शमात्रं प्रतिज्ञा यथा द्रव्यं वायुरिति अविरोधिग्रहणात् प्रत्यक्षानुमानाभ्युपगतशास्त्रस्ववचनविरोधिनो निरस्ता भवन्ति यथानुष्णोऽग्निरिति प्रत्यक्ष
विरोधी घनमम्बरमिति त्वनुमानविरोधी ब्राह्मणेन सुरा पेयेत्यागमविरोधी वैशेषिकस्य सत्कार्यमिति ब्रुवतः स्वशास्त्रविरोधी न शब्दोऽर्थप्रत्या
यक इति स्ववचनविरोधी लिङ्गवचनमपदेशः यदनुमेयेन सहचरितं तत्समानजातीये च सर्वत्र सामान्येन प्रसिद्धं तद्विपरीते च सर्व
स्मिन्नसदेव तल्लिङ्गमुक्तं तस्य वचनमपदेशः यथा क्रियावत्त्वात् गुणवत्त्वाच्च तथा च तदनुमेयेऽस्ति तत्समानजातीये च प्रसिद्धं सर्वस्मिन्गु ५
णवति सर्वस्मिंश्च क्रियावति उभयमप्येतद्द्रव्ये एवास्त्येव तस्मात्तस्य वचनमपदेश इति प्रसिद्धं एतेनासिद्धविरुद्धसंदिग्धानध्यवसितवचन
मनपदेशत्वमुक्तं भवति तत्रासिद्धश्चतुर्विधः उभयासिद्धोऽन्यतरासिद्धस्तद्भावासिद्धोऽनुमेयासिद्धश्चेति तत्रोभयासिद्ध उभयवादि
प्रतिवादिनोरसिद्धः यथा शब्दः अनित्यः सावयवत्वात् अन्यतरासिद्धः कार्यत्वादनित्यः शब्द इति तद्भावासिद्धो यथा धूमभावेनाग्न्य
धिगतः अनुमेयासिद्धः यथा पार्थिवं तमः कृष्णरूपवत्त्वादिति यो ह्यनुमेये विद्यमानोऽपि तत्समानजातीये सर्वस्मिन्नास्ति तद्विपरीते चास्ति स विपरी
तसाधनात् विरुद्धो यथा यस्माद्विषाणी तस्मादश्व इति यस्तु सन्ननुमेये तत्समानासमानजातीययोः साधारणः सन्नेव संदेहज

नकत्वात् संदिग्धो यथा यस्माद्विषाणी तस्माद्गौरिति एकस्मिंश्च द्वयोर्हेत्वोः यथोक्तलक्षणयोर्विरुद्धयोः संनिपाते संशयदर्शनादयमन्यः संदिग्ध
इति केचित् यथा मूर्तत्वामूर्तत्वं प्रति मनसः क्रियावत्त्वात् स्पर्शवत्त्वयोरिति नन्वयमसाधारण एव चाक्षुषप्रत्यक्षत्ववत् संहतयोरन्यतरस्य
यथासंभवात् ततश्चानध्यवसित इति वक्ष्यामः ननु शास्त्रे तत्र तत्रोभयोः परस्परविरोधात् निर्णयानुत्पादे -- स्यात् संशयहेतुत्वं न च त
योस्तुल्यबलत्वमस्ति अन्यतरस्यानुमेयोद्देशस्यागमबाधितत्वात् अयं तु विरुद्ध एव यस्त्वनुमेये विद्यमानस्तत्समानासमानजातीययोश्चास
न्नेव सोऽन्यतरासिद्धः अनध्यवसायहेतुत्वात् अनध्यवसितो यथा सत्कार्यमुत्पत्तेरिति अयमप्रसिद्धोऽनपदेश इति वचनादविरुद्धः ननु चायं
संशयहेतुरभिहितः शास्त्रे तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वादिति नान्यार्थत्वात् शब्दविशेषदर्शनात् संशयानुत्पत्तिरिसु
क्ते नाचार्यमतिनां मतमस्य विशेषः श्रावणत्वं किंतु सामान्यमेव संपद्यते कस्मात् [illegible] यथा तत्स्वभूतेषु द्रव्यादिभेदानामेकैकशो विशेषस्य
उभयथा दृष्टत्वादित्युक्तं न साधर्म्येण वैधर्म्येण तत्रानुमेयेन सामान्येन लिङ्गसामान्यस्यानुविधानदर्शनात् साधर्म्यनिदर्शनं यथा यत्क्रि
यावत् तद्द्रव्यं दृष्टं यथा शरः एवं विपर्यये लिङ्गस्याभावनिदर्शनं वैधर्म्यनिदर्शनं यदद्रव्यं तत्क्रियावन्न भवति यथा सत्तेनेन निदर्शनाभासा
निरस्ता भवन्ति तद्यथा नित्यः शब्दः अमूर्तत्वात् यदमूर्तं तन्नित्यं दृष्टं यथा परमाणुः यथा कर्म यथा -- नायथा तमश्च -- वत् यद्द
व्यं तत्क्रियावद्दृष्टमिति च लिङ्गानुमेयोभयाश्रयासिद्धाननुगतविपरीतानुगताः साधर्म्यनिदर्शनाभासाः यदनित्यं तन्मूर्तं दृष्टं यथा कर्म यथा पर
माणुः यथाकाशः यथा नभः घटवत् यन्निष्क्रियं तदद्रव्यं दृष्टमिति च एवं लिङ्गानुमेयोभयाव्यावृत्ताश्रयासिद्धाव्यावृत्तविपरीतव्याव
र्त्ता वैधर्म्यनिदर्शनाभासा इति निदर्शने अनुमेयसामान्येन सह दृष्टस्य लिङ्गसामान्यस्यानुमेये अर्थानुमेयेन वचनेनोपलभ्यते तदनुसं
धानं तथा च वायुः क्रियावानिति अनुमेयाभावे तस्यासत्त्वमुपलभ्य न च तथा वायुर्निष्क्रिय इति अनुमेयत्वे निर्दिष्टे निश्चिते च परेषां पुनर्नि
श्चयापादनार्थं प्रतिज्ञावचनं प्रत्याम्नायः प्रतिपाद्यत्वेनोद्दिष्टे अनिश्चिते च परेषां हेत्वादिभिरवयवैराहितशक्तीनां परिसमाप्तेन वाक्येन
निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः तदनुमानत्वं प्रत्ययमेवेति नह्येतस्मिन्नसति परेषां सर्वेषामवयवानां समस्तानामरतानां
तदर्थवाचकत्वमेव लिङ्गम्यमानोऽर्थादिति चेन्नातिप्रसङ्गात् तथा हि प्रतिज्ञानन्तरं हेतुवादाभिधानात् कर्तव्यं विदुषामन्वयव्यतिरेकश्चाव
अर्थावगतिविवक्षति तस्मादत्रैवार्थपरिसमाप्तिः कथं अनित्यः शब्दः इत्यनेन साध्यसामान्यानिश्चिता नित्यत्वमात्रविशिष्टः शब्दः कथ्यते प्रयत्नानं
तरीयकादित्यनेन साधनधर्ममात्रं न त्विधीयते इत्यत्र प्रयत्नानन्तरीयकं दृष्टं तदनित्यं यथा घटादित्यनेन साध्यसमेतो न साधनसामान्यस्यानुगमन
त्रेणुचितं नित्यं प्रयत्नान्तरीयकं दृष्टं यथाकाशमित्यनेन साध्याभावे साधनस्यासत्त्वं प्रदर्श्य तथा च प्रयत्नानन्तरीयकं शब्द इत्यनेन तथाकाश

वरंतरीयकः शब्दस्सन्वयव्यतिरेकाभ्यां दृष्टसामर्थ्यस्य साधनसामान्यस्य शब्देनुसंधानं गम्यते तस्मादनित्यः शब्द इत्येवं अतीत एव शब्दः प्रतिपिपादयिषि
गु.भा. तार्थपरिसमाप्तिर्गम्यते तस्मात्पंचावयवेनैव वाक्येन परेषां स्वनिश्चितार्थप्रतिपादनं क्रियत इत्येतत्परार्थानुमानं सिद्धं विशेषदर्शनजमवधारणं ज्ञानं सं
शयविरोधीति निर्णयः एतदेव प्रत्यक्षमनुमानं च यद्विशेषदर्शनात् संशयविरोध्युत्पद्यते सोऽपि निर्णयः यथा स्थाणुपुरुषयोरूर्ध्वतामात्रसदृशालोचना
६ द्विशेषेष्वप्रत्यक्षेषु उभयविशेषानुस्मरणात् स्थाणुः पुरुषो वेति संशयोत्पत्तौ शिरःपाण्यादिदर्शनात् पुरुष एवायमित्यवधारणज्ञानं प्रत्यक्षविरोधि
विषाणमात्रदर्शनात् गौर्गवयो वेति संशयोत्पत्तौ सास्नामात्रदर्शनात् गौरेवायमित्यवधारणज्ञानं अनुमाननिर्णयः लिङ्गदर्शनेच्छानुस्मरणाद्यपे
क्षादात्ममनसोः संयोगविशेषात् पट्वभ्यासादरप्रत्ययजनिताच्च संस्काराद्दृष्टश्रुतानुभूतेष्वर्थेषु शेषानुव्यवसायेच्छानुस्मरणद्वेषहेतुरतीतविषया स्मृ
तिरिति आम्नायविधातॄणामृषीणां अतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगविशेषात् धर्मविशेषा
च्च यत्प्र- तज्ज्ञानमुत्पद्यते तदार्षमित्याचक्षते तत्प्रस्तारेण देवर्षीणां कदाचिदेव लौकिकानां यथा कन्यका ब्रवीति श्वो मे भ्राता आगंतेति हृदयं मे
कथयतीति सिद्धदर्शनं ज्ञानं तत्कथं यत्सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु सिद्धानां दृष्टृणां चक्षुषोरंजनपादलेपखड्गगुटिकादिसिद्धानां दर्शनं प्रत्य
क्षमेव अथ दिव्यांतरिक्षभौमानां प्राणिनां ग्रहनक्षत्रसंचारादिनिमित्तं प्राणिनां धर्माधर्मविपाकदर्शनमिष्टं तदनुमानमेव अथ लिङ्गानपेक्षं धर्मादिष्वेव दर्शनमिष्टं
तदपरोक्षप्रत्यक्षश्च तदन्यतरस्मिन्नन्तर्भूतमितीयं बुद्धिः अनुग्रहलक्षणं सुखं स्रगाद्यभिप्रेतविषयसान्निध्ये सतीष्टोपलब्धीन्द्रियार्थसन्निकर्षा
द्धर्माद्यपेक्षादात्ममनसोः संयोगाद्यदनुग्रहाभिष्वंगनयनादिप्रसादजनकमुत्पद्यते तत्सुखमतीतेषु विषयेषु स्मृतिजमनागतेषु संकल्पजमिति
यत्तु विदुषामानसं सुखं खानुसरपासंकल्पेष्वाविर्भवति तद्विद्याशांतिसंतोषधर्मविशेषनिमित्तमिति उपघातलक्षणं दुःखमिति विषा
द्यभिप्रेतविषयसान्निध्ये सत्यनिष्टोपलब्धेरिन्द्रियार्थसन्निकर्षाद्धर्मापेक्षादात्ममनसोः संयोगाद्यदमर्षोपघातदैन्यादिनिमित्तमुत्पद्यते
तद्दुःखं अतीतेषु सर्पव्याघ्रादिषु स्मृतिजमनागतेषु संकल्पजमिति स्वार्थं परार्थं वा अप्राप्तप्रार्थनेच्छा सा चात्ममनसोः संयोगात्सु
खाद्यपेक्षादुत्पद्यते प्रयत्नस्मृतिधर्माधर्महेतुः कामोऽभिलाषः रागः संकल्पः कारुण्यं वैराग्यं उपधा भाव इत्येवमादय इच्छाभेदाः मैथु
नेच्छा कामः अभ्यवहरणेच्छाभिलाषः पुनःपुनर्विषयानुरंजनेच्छा रागः अनासन्नक्रियेच्छा संकल्पः स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा कारु
ण्यं दोषदर्शनाद्विषयपरित्यागेच्छा वैराग्यं परवंचनेच्छा उपधा अंतर्निगूढेच्छा भावः चिकीर्षाजिहीर्षादिक्रियाभेदादिच्छाभेदा भवति प्रज्वल ६
नात्मको द्वेषः यस्मिन्सति प्रज्वलितमिवात्मानं मन्यते स द्वेषः स चात्ममनसोः संयोगाद्दुःखापेक्षादुत्पद्यते प्रयत्नस्मृतिधर्मा
धर्महेतुः द्रोहः क्रोधो मन्युः अक्षमामर्ष इति द्वेषभेदाः प्रयत्नः संरंभ उत्साह इति पर्यायाः स द्विविधो जीवनपूर्वक इच्छाद्वेषपूर्वकश्च तत्र

जीवनपूर्वकः सुप्तस्य प्राणापानसंतानप्रेरकः प्रबोधकाले चांतःकरणस्येन्द्रियांतरप्राप्तिहेतुः अस्य जीवनपूर्वकस्य आत्ममनसोः संयोगाद्धर्माधर्मापेक्षादु
त्पत्तिः इतरस्तु हिताहितप्राप्तिपरिहारसमर्थस्य व्यापारस्य हेतुः शरीरस्य धारकश्च स चात्ममनसोः संयोगादिच्छाद्वेषापेक्षादुत्पद्यते गुरुत्वं जलभूम्योः
पतनकर्मकारणं अप्रत्यक्षं पतनकर्मानुमेयं संयोगप्रयत्नसंस्कारविरोधि अस्य चाबादिपरमाणुरूपादिवत् नित्यानित्यत्वनिष्पत्तय इति द्रवत्वं स्यन्दनक
र्मकारणं त्रिद्रव्यवृत्ति तत्तु द्विविधं सांसिद्धिकं नैमित्तिकं च सांसिद्धिकमपां विशेषगुणः नैमित्तिकं पृथिवीतेजसोः सामान्यगुणः सांसिद्धिकस्य गुरु
त्ववन्नित्यानित्यत्वनिष्पत्तयः संघातदर्शनात् सांसिद्धिकं द्रवत्वमयुक्तमिति चेत् दिव्येन तेजसा संयुक्तानामाप्यानां परमाणूनां परस्परसंयोगो द्रव्या
रंभकः संघाताख्यः तेन परमाणुद्रवत्वप्रतिबन्धात् कार्ये हिमकरकादौ द्रवत्वानुत्पत्तिः नैमित्तिकं पृथिवीतेजसोः अग्निसंयोगजं कथं सर्पि
र्जतुमधूच्छिष्टादिकारणेषु परमाणुषु अग्निसंयोगाद्वेगापेक्षात् कर्मोत्पत्तौ तज्जेभ्यो विभागेभ्यो द्रव्यारंभकसंयोगविनाशात्कार्यद्रव्यनिवृत्तौ अग्नि
संयोगादुष्णापेक्षात् स्वतंत्रेषु परमाणुषु द्रवत्वमुत्पद्यते ततस्तेषु भोगिनामदृष्टापेक्षादात्ममनःसंयोगात् कर्मोत्पत्तौ तज्जेभ्यः संयोगेभ्यो द्व्यणुका
दिप्रक्रमेण कार्यद्रव्यमुत्पद्यते तस्मिंश्च रूपाद्युत्पत्तिः कारणगुणप्रक्रमेण द्रववत्त्वमुत्पद्यते स्नेहोऽपां विशेषगुणः संग्रहमृजा
दिहेतुः अस्यापि गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापकश्चेति तत्र वेगो मूर्तिमत्सु पंचसु द्रव्येषु निमित्त
विशेषापेक्षात्कर्मणो जायते नियतदिक्क्रियाप्रतिबन्धहेतुः स्पर्शवद्द्रव्यसंयोगविशेषविरोधी क्वचित्कारणगुणप्रक्रमेणोत्पद्यत इति भावना
संज्ञकस्त्वात्मनः दृष्टश्रुतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतुः ज्ञानमददुःखादिविरोधी पट्वभ्यासादरप्रत्ययजः पटुप्रत्ययापेक्षादात्म
मनसोः संयोगविशेषादाश्चर्येऽर्थे पटुः संस्कारो जायते यथा दाक्षिणात्यस्योष्ट्रदर्शनात् विद्याशिल्पव्यायामादिष्वभ्यस्यमा
नेषु तस्मिन्नेवार्थे पूर्वसंस्कारमपेक्षमाणादुत्तरोत्तरस्मात्प्रत्ययादात्ममनसोः संयोगात्संस्कारातिशयो प्रयत्नेन चक्षुर्मनः स्थापयित्वा
पूर्वमर्थं दिदृक्षमाणस्य विद्युत्संपातदर्शनवदादरप्रत्ययमपेक्षमाणादात्ममनसोः संयोगात्संस्कारातिशयो जायते यथा देवह्रदे सौवर्णराजत
पद्मदर्शनादिति स्थितिस्थापकस्तु स्पर्शवद्द्रव्येषु वर्तमानो घनावयवसन्निवेशविशिष्टेषु कालांतरावस्थायिषु स्वाश्रयमन्यथाकृतं यथावत्स्थितं स्था
पयति स्थावरजंगमविकारेषु धनुःशाखाशृंगदंतास्थिसूत्रवस्त्रादिषु भुग्नसंभुग्नेषु तस्य कार्यं लक्ष्यते नित्यानित्यत्वनिष्पत्तयो स्पर्शवद्
द्रव्यवत् धर्मः पुरुषगुणः कर्तुः प्रियहितमोक्षहेतुः अतीन्द्रियः अन्त्यसुखसंविज्ञानविरोधी पुरुषान्तःकरणसंयोगजः विशुद्धाभिसंधिजो
वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः तस्य तु साधनानि श्रुतिस्मृतिविहितानि वर्णाश्रमिणां सामान्यविशेषभावेनावस्थितानि द्रव्य

गु.भा. गुणाकर्माणि तत्र सामान्यानि धर्मसाधनानि धर्मश्रद्धाऽहिंसाभूतहितत्वं सत्यवचनमस्तेयं ब्रह्मचर्यमनुपधा क्रोधवर्जनमभिषेचनं शुचिद्रव्यसेवनं विशिष्टदेवताभ

क्तिरुपवासो ऽप्रमादश्च ब्राह्मणक्षत्रियविशामिज्याध्ययनदानानि ब्राह्मणस्य विशिष्टानि प्रतिग्रहाध्यापनयाजनानि स्ववर्णनियताश्च संस्काराः

७ क्षत्रियस्य सम्यक्प्रजापरिपालनमसाधुनिग्रहो युद्धेष्वनिवर्तनं स्वकीयाश्च संस्काराः वैश्यस्य क्रयविक्रयकृषिपशुपालनानि स्वकीयाश्च संस्काराः

शूद्रस्य पूर्ववर्णपारतंत्र्यं अमंत्रिकाश्च क्रियाः आश्रमिणां ब्रह्मचारिणो गुरुकुलवासिता स्वशास्त्रविहितानि गुरुशुश्रूषा अग्नींधनभैक्षाचरणा

नि मधुमांसदिवास्वप्नांजनाभ्यंजनादिवर्जनं च विद्याव्रतस्नातकस्य कृतदारस्य गृहस्थस्य शालीनयायावरवृत्त्युपार्जितैरर्थैर्भूतमनुष्यदेवपितृब्रह्माख्यानां पंचानां महाय

ज्ञानां सायंप्रातरनुष्ठानं एकाग्निविधानेन पाकयज्ञसंस्थानां च नित्यानां यथाशक्ति हविर्यज्ञसंस्थानां अग्निहोत्रादीनां सोमयज्ञसंस्थानां

नां ऋत्वंतरेषु ब्रह्मचर्यमपत्योत्पादनं च ब्रह्मचारिणो गृहस्थस्य वा ग्रामान्निर्गतस्य वनेषु वल्कलाजिनकेशश्मश्रुनखरोमधारणं च वन्याधान्नेना

तिथिशेषभोजनं नित्यं यस्तु स्वत्रयाणामन्नानामस्याभावतः सर्वभूतेभ्यो नित्यमभयदानं संन्यस्य निष्काम्यानि कर्माणि यमनियमेष्वप्रमत्तस्य षट्पदार्थपरिसंख्यानं

चयोगस्थानं प्रव्रजितस्येति दृष्टं च प्रयोजनमनुद्दिश्य एतानि साधनानि भावप्रसादं चापेक्ष्यात्ममनसोः संयोगाद्धर्मोत्पत्तिरिति अनिषिद्धानि धर्मसाधनविरोधी

पवीतानि हिंसानृतस्तेयादीनि अवश्यकर्तव्याकरणं प्रमादश्च एतानि दुष्टाभिसंधिं चापेक्ष्यात्ममनसोः संयोगादधर्मोत्पत्तिरिति अविदुषो रागद्वेषवतः प्रवर्तकाद्

नीतप्रकृष्टात्स्वल्पाधर्मसहिताद्धर्माद् ब्रह्मेंद्रप्रजापतिपितृमनुष्यलोकेषु आशयानुरूपैः शरीरेंद्रियसुखादिविषयाभियोगो भवति तथा प्रकृष्टाद् धर्मात्स्व

ल्पधर्मसहितात् प्रेततिर्यग्योनिषु अनिष्टशरीरेंद्रियदुःखादिभिर्योगो भवति एवं प्रवृत्तिलक्षणाद्धर्माद् धर्मसहिताद्देवमानुषतिर्यग्योन्यादिष्वनेकशः पुनःपुनः

संसारप्रबंधो भवति ज्ञानपूर्वकात्तु कृतादसंकल्पितफलाद् विशुद्धकुले जातस्य दुःखविगमोपायजिज्ञासोराचार्यमुपसंगम्योत्पन्नषट्पदार्थतत्त्व

ज्ञानस्याज्ञाननिवृत्तौ विरक्तस्य रागद्वेषाद्यभावात् तज्जयोर्धर्माधर्मयोरनुत्पत्तौ संचितयोश्च निरोधे संतोषसुखं शरीरपरिच्छेदं चोत्पाद्य रागादिनिवृत्तौ नि

वृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं कृत्वा निवर्तते तदा निरोधादात्मनः शरीरादिनिवृत्तौ पुनः शरीराद्यनुत्पत्तौ दग्धेंधनानलवदुपशमो मो

क्ष इति शब्दोऽंबरगुणः श्रोत्रग्राह्यः क्षणिकः कार्यकारणविरोधी संयोगविभागशब्दजः प्रदेशवृत्तिः समानासमानजातीयकारणः स द्विविधो वर्णल

क्षणो ध्वनिलक्षणश्च अकारादिर्वर्णलक्षणः शंखादिनिमित्तो ऽवर्णलक्षणश्च तत्र वर्णलक्षणस्योत्पत्तिरात्ममनसोः संयोगात् स्मृत्यपेक्षाद्वर्णोच्चारणेच्छा

तदनंतरं प्रयत्नस्तमपेक्षमाणादात्मवायुसंयोगाद्वायौ कर्म जायते स चोर्ध्वं गच्छन् कंठादीनभिहंति ततः स्थानवायुसंयोगापेक्षात् स्थाना

काशसंयोगाद्वर्णोत्पत्तिः अवर्णलक्षणोऽपि भेरीदंडसंयोगापेक्षाद्भेर्याकाशसंयोगादुत्पद्यते वेणुपर्वविभागापेक्षाद्वेण्वाकाशविभागाच्च शब्दाच्च संयो

गविभागनिष्पन्नाद्वीचिसंतानवत् — संतानएव संताने श्रोत्रप्रदेशमागतस्य ग्रहणं श्रोत्रशब्दयोः संयोगमतागमनाभावादप्राप्तस्य चानुपलब्धेः परिशे

षात् संतानसिद्धिरिति गुणपदार्थः समाप्तः उत्क्षेपणादीनां पंचानामपि कर्मत्वसंबंधः एकद्रव्यवत्त्वं क्षणिकत्वं मूर्तद्रव्यवृत्तित्वं अगुणवत्त्वं गुरुत्वद्रवत्वप्रयत्नसं

योगजत्वं स्वकार्यविरोधित्वं संयोगविभागनिरपेक्षकारणत्वं असमवायिकारणत्वं स्वपराश्रयसमवेतकार्यारंभकत्वं द्रव्यानारंभकत्वं प्रतिनियत

जातियोगित्वं दिग्विशिष्टकार्यारंभकत्वं च विशेषः तत्रोत्क्षेपणं शरीरावयवेषु तत्संबद्धेषु च ऊर्ध्वभाग्भिः प्रदेशैः संयोगकारणं अधोभागैश्च प्रदेशैः

विभागकारणं कर्मोत्पद्यते गुरुत्वप्रयत्नसंयोगेभ्यः तदुत्क्षेपणं तद्विपरीतसंयोगविभागकारणं कर्मापक्षेपणं ऋजुनो द्रव्यस्याग्रावयवानां तद्देशैः

संयोगविभागौ मूलप्रदेशैः येन कर्मणावयवी कुटिलः संजायते तदाकुंचनं तद्विपर्ययेण संयोगविभागोत्पत्तौ येन कर्मणावयवी ऋजुः संपद्यते तत्प्रसार

णं यदनियतदिग्देशसंयोगविभागकारणं तद्गमनमिति एतत्पंचविधमपि कर्म शरीरावयवेषु तत्संबद्धेषु च सत्प्रत्ययमसत्प्रत्ययं च यदन्यत्तदप्रत्ययमे

वान्येषु च तद्गमनमेव कस्मात् कर्मणां जातिपंचकत्वमयुक्तं गमनाविशेषात् सर्वं हि क्षणिकं कर्म चलनमात्रमनुसंतन्वत् स्वाश्रयस्योर्ध्वमधस्तिर्य

ग्वा परमाणुमात्रैः प्रदेशैः संयोगविभागान् करोति सर्वत्र गमनप्रत्ययोऽविशिष्टः तस्माद्गमनमेव सर्वमिति न वस्तुतः प्रत्ययानुवृत्तिदर्शनादिहोत्क्षेपणं

गुडाकुंचनं एवमादि सर्वत्र वस्तुतः प्रत्ययानुवृत्तिर्व्यावृत्तिश्च दृष्टत्वात् हेतुः सामान्यविशेषभेदादवगम्यते तेषां तु भेदो ह्युपसर्गविशेषात् प्रतिनियतदिग्विशिष्ट

कार्यारंभात् उपलक्षणभेदोऽपि सिद्ध इति एवमपि पंचैव धारणानुपपत्तिः निष्क्रमणप्रवेशनादिष्वपि वस्तुतः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनात् यदि

उत्क्षेपणादिषु सर्वत्र वस्तुतः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनाज्जातिभेद इष्यते एवं च निष्क्रमणप्रवेशनादिष्वपि कार्यभेदवृत्तिषु प्रत्ययानुवृत्ति

व्यावृत्ती इति चेत् उत्क्षेपणादिप्रत्ययेऽपि कार्यभेदादेव प्रत्ययानुवृत्तिव्यावृत्तिप्रसंगः समानेऽपि वस्तुतः प्रत्ययानुवृत्तिव्यावृत्तिसद्भावे सति उ

त्क्षेपणादीनां जातिभेदो न निष्क्रमणादीनामिति अत्र न विशेषहेतुरस्तीति चेत् न जातिसंकरप्रसंगात् निष्क्रमणादीनां जातिभेदात् प्रत्ययव्या

वृत्तौ जातिसंकरः प्रसज्यते कथं द्वयोर्द्रष्ट्रोः एकस्मादपवरकादपवरकांतरं गच्छतो युगपन्निष्क्रमणप्रवेशनप्रत्ययौ दृष्टौ तथा द्वारप्रदेशे प्रविशति

निष्क्रामतीति च यदि — धपनीतं भवति तद् ह्लन्निष्क्रमणप्रत्यये नापि प्रवेशनप्रत्यय इति किं तर्हि गमनप्रत्यय एव भवति तथा नलिकायां

वंशपत्रादौ पतति दृष्टृणां युगपद्भ्रमणपतनप्रवेशनप्रत्यया इति जातिसंकरप्रसंगः न चैवमुत्क्षेपणादिषु प्रत्ययसंकरो दृष्टस्तस्माद् उत्

क्षेपणादीनामेव जातिभेदात्प्रत्ययव्यावृत्तिरेव संकरादीनां तु तत् कार्यभेदादिति कथं युगपत्प्रत्ययभेद इति चेत् यथा मते जातिसंकरो नास्ति

एवमनेककर्मसमावेशोऽपि नास्तीति एकस्मिन् कर्मणि युगपद् दृष्टृणां भ्रमणपतनप्रवेशनप्रत्ययाः कथं भवंतीति अत्र ब्रूमः नावयवावयवि

नोर्दिग्देशविशिष्टसंयोगविभागभेदात्तयोर्हि द्रष्टा अवयवप्राग्भवतः पर्यवेणादिकप्रदेशैः संयोगविभागान्पश्यति तस्य भ्रमणप्रत्ययो

भवति यो ह्यवयविनमूर्ध्वप्रदेशैः विभागं अधः संयोगमपश्यति तस्य पतनप्रत्ययः यः पुनर्नलिकांतर्देशसंयोगं बहिर्देशे च विभागं

पश्यति तस्य प्रवेशनप्रत्यय इति सिद्धः कार्यभेदान्निष्क्रमणादीनां प्रत्ययभेदः भवति उत्क्षेपणादीनां जातिभेदात्तु प्रत्ययभेदः अथ गम

गु.भा. ननु किं कर्मत्वपर्यायः आहोस्वित् अपरसामान्यमिति कुतस्ते संशयः समस्तेषूत्क्षेपणादिषु भ्रमणादिषु च कर्मप्रत्ययवत् गमनप्रत्ययाविशेषात्
कर्मत्वपर्याय इति गम्यते यत्तूत्क्षेपणादिषु विशेषसंज्ञया विहितं तस्मादपरसामान्यं स्यादिति न कर्मत्वपर्यायो वा प्रत्ययपुरुषवत् कर्मत्वमेव गमनत्वं
अथ विशेषसंज्ञाभिः किं न थं गमनग्रहणं कृतमिति न भ्रमणाद्यवरोधार्थं वा उत्क्षेपणादिशब्दैरनवरुद्धानां भ्रमणपतनस्यन्दनादीनां अवरोधार्थं गमन
८ ग्रहणं कृतं अन्यथा हि यान्येव चत्वारि विशेषसंज्ञो कानि तान्येव सामान्यविशेषाणि प्रसज्येरन्निति अथापरत्वं अपरसामान्यं गमनत्वं अनियतदिग्
देशसंयोगविभागकारणेषु भ्रमणादिषु वर्तते गमनशब्दस्तु उत्क्षेपणादिषु भाक्तो द्रष्टव्यः स्वाश्रयसंयोगविभागकर्तृत्वसामान्यादिति शरीरावयवकर्मविधिः
कथं चिकीर्षु यज्ञाध्ययनदाने कण्डूयनादिषु यदा हस्तमुत्क्षेप्तुमिच्छति अवक्षेप्तुं वा तदा हस्तवत्वात्मप्रदेशे प्रयत्नः संजायते तं प्रयत्नं गुरुत्वं चापेक्षमाणादात्महस्त
संयोगाद्धस्ते कर्म भवति हस्तवत् सर्वशरीरावयवेषु पादादिषु शरीरे चेति तथा बन्धेऽपि कथं यदा हस्तेन मुसलं गृहीत्वेच्छां करोति उत्क्षिपामि हस्तेन मु
सलमिति तदनन्तरं प्रयत्नस्तमपेक्षमाणात् आत्महस्तसंयोगाद्यस्मिन्नेव काले हस्ते उत्क्षेपणकर्मोत्पद्यते तस्मिन्नेव काले तं प्रयत्नमपेक्षमाणाद्धस्तमुसल
संयोगान्मुसलेऽपि कर्म भवति तदनन्तरं दूरमुत्क्षिप्ते मुसले तदर्थेच्छा निवर्तते पुनरप्यवक्षेपणेच्छा संजायते तदनन्तरं प्रयत्नस्तदपेक्षमाणाद्यथोक्तात् संयोगाद्
हस्तमुसलयोरवक्षेपणकर्मणी भवतः ततोऽन्येन मुसलकर्मणा उलूखलमुसलयोरभिघाताख्यः संयोगः क्रियते स च संयोगो मुसलगतवेगमपे
क्षमाणो मुसले उत्पतनकर्म करोति तत्कर्माभिघातापेक्षं मुसले संस्कारमारभते तमपेक्ष्य मुसलहस्तसंयोगः अप्रत्ययं हस्तेऽप्युत्पतनकर्म करोति यद्य
पि प्राक्तनः संस्कारो विनष्टस्तथापि मुसलोलूखलयोः संयोगः पटुकर्मोत्पादकः संयोगविशेषभावात् तस्य संस्कारारम्भे साचिव्यसमर्थो भवति अथ
वा प्राक्तन एव पटुः संस्कारो अभिघातादविनश्यमानोऽवतिष्ठत इति अतः संस्कारवति पुनः संस्कारारम्भो नास्त्यतः यस्मिन्नेव काले संस्कारापेक्षादभिघाता
दप्रत्ययं मुसले उत्पतनकर्म तस्मिन्नेव काले तमेव संस्कारमपेक्षमाणान्मुसलहस्तसंयोगादप्रत्ययं हस्तेऽप्युत्पतनकर्मेति पाणिमुक्तेषु गमनविधिः क
थं यदा तोमरं हस्तेन गृहीत्वोत्क्षेप्तुमिच्छोत्पद्यते तदनन्तरं प्रयत्नस्तमपेक्षमाणादात्महस्तसंयोगात् तोमरहस्तयोर्युगपदाकर्षणार्थं कर्मणी भवतः प्रसा
रितेऽथ हस्ते तदाकर्षणार्थः प्रयत्नो निवर्तते तदनन्तरं तिर्यगूर्ध्वं दूरमासन्नं वा क्षिपामीतीच्छा संजायते तदनन्तरं तदनुरूपः प्रयत्नस्तमपेक्षमाणस्तोम
रहस्तसंयोगो नोदनाख्यस्तस्मान्नोदनाख्याद्यथोक्ते निष्ठुरे कर्मास्मिन्नुत्पन्ने नोदनापेक्षस्तस्मिन्संस्कारमारभते ततः संस्कारनोदनाभ्यां तावत्कर्माणि भ
वन्ति यावद्धस्ततोमरविभाग इति ततो विभागान्निवृत्ते नोदने संस्कारादूर्ध्वं तिर्यग्दूरमासन्नं वा प्रयत्नानुरूपाणि कर्माणि भवन्ति आपतनादिति तथा यन्त्र
मुक्ते गमनविधिः कथं यो बलवान् कृत-- यामो वामकरेण धनुर्विष्टभ्य दक्षिणेन शरं संधाय सशरां ज्यां मुष्टिना गृहीत्वाकर्षणेच्छां करोति सेच्छाकर्षणि ८
तद्धनुरिति तदनन्तरं प्रयत्नसमपेक्षमाणात् ज्याहस्तसंयोगादाकर्षणकर्म हस्ते यदैवोत्पद्यते तदैव तमेव प्रयत्नमपेक्षमाणाद्धस्तज्याशरसंयोगा
ज्ज्याशरयोः कर्म प्रयत्नविशिष्टहस्तज्याशरसंयोगमपेक्षमाण-- ज्याकोटिसंयोगाभ्यां संयोगाभ्यां धनुष्कोट्योरिति तत्सर्वं युगपदेव आकृष्यते कुण्डलीभूतं
धनुषि नातः परमनेन गन्तव्यमिति यदा ज्ञानं ततः तदाकर्षणार्थस्य प्रयत्नस्य विनाश इति ततः पुनर्मोक्षणेच्छा तदनन्तरं प्रयत्नस्तदपेक्षमाणादात्मांगुलिसं

योगादंगुलिकर्म तस्मात् ज्यांगुलिशरविभागस्ततो विभागात् संयोगविनाश इति तस्मिन्विनष्टे प्रतिबन्धकाभावात् यद्धनुषि वर्तमानः स्थितिस्थापकः संस्कारो
मण्डलीभूतं धनुर्यथावस्थितं स्थापयति तदा तमेव संस्कारमपेक्षमाणाद्धनुर्ज्यासंयोगाज्ज्यायां कर्मोत्पद्यते शरे च तत्स्वकारणापेक्षा यं संस्कारं करोति तम
पेक्षमाणाद् ज्यासंयोगान्नोदनं तस्मादिष्वाद्यकर्म नोदनाख्यं निष्ठुरे संस्कारमारभते ततः संस्कारान्नोदनसहायात् तावत्कर्माणि भवन्ति यावदिषुज्यावि
भागः ततो विभागान्निवृत्ते नोदने कर्माणि उत्तरोत्तरादपि संस्कारादापतनादिति निवृत्तिकर्माणि क्रमशः कारणं संयोगवदुत्तरोत्तरं संस्कारोऽन्तरा
लकर्मणामपेक्षाभावादिति एवमात्माधिष्ठितेषु सत्स्ववयवसत्स्व यच्च कर्मोक्तं अनधिष्ठितेषु बाह्येषु चतुर्षु महाभूतेषु सत्स्वप्रत्ययं गमनमेव
नोदनादिभ्यो भवति तत्र नोदनं गुरुत्वद्रवत्ववेगप्रयत्नान् समस्तान् व्यस्तानपेक्षमाणो यः संयोगविशेषो नोदनाविभागहेतोः कर्मणः कारणं तत्का
रणा चतुर्ष्वपि महाभूतेषु कर्म भवति यथा पङ्काख्यायां पृथिव्यां वेगापेक्षाद्यः संयोगविशेषो विभागहेतोरेकस्य कर्मणः कारणं सोऽभिघातस्तस्माद
पि महाभूतेषु कर्म भवति यथा पाषाणादिषु तथा पादादिभिर्नुद्यमानायाम् अभिहन्यमानायां वा पङ्काख्यायां पृथिव्यां यः संयोगो नोदनाभिघा
तयोरन्यतरापेक्ष उभयापेक्षो वा स संयुक्तसंयोगस्तस्मादपि पृथिव्यादिषु कर्म भवति व्यपदेशात्तु न नोदनाभिघातनाभिद्यन्ते तेष्वपि कर्म जायते
पृथिव्युदकयोर्गुरुत्वविधायकसंयोगप्रयत्नवेगाभावे गुरुत्वादधोगमनं तत्पतनं यथा मुसलशरीरादिषूक्तं तत्राद्यकर्मगुरुत्वात् द्वितीया
दीनि गुरुत्वसंस्काराभ्यां स्रोतोभूतानामपां स्थलान्निम्नाभिसर्पणं यात् तद्द्रवत्वात् स्यन्दनं कथं समन्तादोधः संयोगेनावयविद्रवत्वं प्रतिबद्धं अवयव
द्रवत्वमप्येकार्थसमवेतत्वात् प्रतिबद्धं तु उत्तरोत्तरापि तु अवयवद्रवत्वानि संयुक्तसंयोगः प्रतिबद्धानि यदा तु -- सेतुभङ्गः कृतो भवति तदा समन्तात् प्र
तिबद्धत्वादवयविद्रवत्वस्य कार्यारम्भो नास्ति सेतुसमीपस्थस्य तु अवयवद्रवत्वस्य उत्तरोत्तरेषामवयवद्रवत्वानां प्रतिबन्धकाभावाद्वृत्तिलाभस्ततः कर्म
शरः संयुक्तानामेवाभिसर्पणं ततः पूर्वद्रव्यविनाशे प्रतिबन्धेनावस्थितैरवयवैर्दीर्घद्रव्यमारभ्यते तत्र च कारणगुणप्रक्रमेण द्रवत्वमुत्पद्यते तत्र च
कारणानां संयुक्तानां प्रतिबन्धेन गमनेन यदवयविनि कर्मोत्पद्यते तत्स्यन्दनाख्यमिति संस्कारात्कर्मेत्युक्तं तथा चक्रादिष्ववयवानां
पार्श्वतः प्रतिनियतदिग्देशसंयोगविभागोत्पत्तौ यदवयविनि संस्कारादभिघाताद्दिग्देशसंयोगविभागनिमित्तं कर्म तद्भ्रमणाख्यमिति
एवमादयो गमनविशेषाः प्राणाख्ये तु वायौ कर्म आत्मवायुसंयोगादिच्छाद्वेषपूर्वकप्रयत्नापेक्षाज्जाग्रत इच्छानुविधानदर्शनात् सुप्तस्य
तु जीवनपूर्वकप्रयत्नापेक्षात् मनसः शरीरेणागतानां सतामपि द्रव्यत्वे निष्क्रियत्वसामान्यवदमूर्तत्वादमूर्तिः सर्वगतत्वपरिमाणं तदनुवि
धायिनी च क्रिया स्यात् आकाशादिषु नास्तीति तस्मादेतेषां कर्मपासम्बोधोऽस्तीति सविग्रहे मनसि इन्द्रियान्तरमेवमपेक्षमाणाज्जाग्रतः
कर्मात्मनः संयोगात्प्रयत्नपूर्वकप्रयत्नापेक्षादन्यत्रापि इन्द्रियान्तरेणाविषयपलब्धिदर्शनात् सुप्तस्य प्रबोधकाले जीवनपूर्वकप्रयत्नो
पेक्षादपसर्पणमुपसर्पणं च कर्मात्ममनसोः संयोगादपेक्षात् तदर्थं यदाजीवनसहकारि धर्माधर्मयोरुपभोगात् यद्य

गु. ९

न्योन्याभिवर्वाभवति तदातीवनसहायपोर्वैकल्यान्नसूर्वप्रयत्नवैकल्यात् प्राणापानयोर्निरोधेसति अन्यानन्यापत्त्यौ लब्धवृत्तिभ्यां धर्माध
र्माभ्यां आत्ममनसोः संयोगसचिवाभ्यां मृतशरीरात् विभागकारणमाकर्षणकर्मोत्पद्यते ततः शरीरात् बहिरपगतं ताभ्यामेव धर्माधर्मा
भ्यां उत्पन्नानि वाह्किकशरीरेण संबध्यते तत्संक्रांतिः स्वर्गनरकंवा गत्वा आश्रयानुरूपेण शरीरेण संबध्यते तत्संयोगार्थं कर्म उपसर्पणा
ख्यमिति योगिनोवहिर्देशे चिदात्ममनसो दृष्टिप्रेते द्रागमनं प्रत्यागमनं वा स्वर्गकाले प्रसवेपि शरीरेण संबंधार्थं कर्मादृष्टकारितं अन्य
दपि महाभूतेषु यत्प्रत्यक्षानुमानाभ्यां अनुपलभ्यमानकारणं उपकारापकारसमर्थं भवति तददृष्टकारितं तथा सर्गादौ अनुकर्म अग्निवाय्वो
रूर्ध्वतिर्यग्गमनं महाभूतानां प्रक्षोभणं अभीलांच तस्कर प्रतिगमनं अपरोक्ष उपसंक्रातामिसार्पणं वेति कर्मपदार्थः समाप्तः सामान्यं
द्विविधं परमपरंच विषयसर्वगतमभेदात्मानेकवृत्ति एकद्विबहुस्वात्मस्वरूपानुवृत्तिप्रत्ययकारणं स्वरूपाभेदेनाधारेषु कर्मप्रबंधेन वर्त
मानमनुवृत्तिप्रत्ययकारणं कथं प्रतिपिंडं सामान्यापेक्षं ज्ञानोत्पत्तावभ्यासप्रत्ययजनितसंस्कारात् अतीतज्ञानप्रबंधप्रत्यवेक्षणात् यत्तदनु
गतमस्ति तत्सामान्यं तत्र परसत्तासामान्यमनुवृत्तिप्रत्ययकारणमेव यथा परस्परविशिष्टेषु चर्मवस्त्रकंबलादिषु अन्यस्मान्नीलद्रव्यसं
बंधात् नीलंनीलमेतदिति प्रत्ययानुवृत्तिः तथा परस्परविशिष्टेषु द्रव्यगुणकर्मस्वविशिष्टा सत्तेति प्रत्ययानुवृत्तिः च सा चार्था
तरसंबंधाद्भवितुमर्हतीति यत्तदर्थांतरं सा सत्तेति सिद्धा सत्तातः संबंधात्सदिति प्रत्ययानुवृत्तिः तस्मात्सत्तासामान्यमेव अपरं द्र
व्यत्वगुणत्वकर्मत्वाद्यनुवृत्तिव्यावृत्तिप्रत्ययहेतुत्वात् सामान्यविशेषाख्यं भवति तत्र द्रव्यत्वं परस्परविशिष्टेषु पृथिव्यादिष्वनुवृत्तिप्रत्यय
हेतुत्वात् सामान्यं गुणकर्मभ्यो व्यावृत्तिप्रत्ययहेतुत्वाद्विशेषः तथा गुणत्वं परस्परविशिष्टेषु रूपादिषु अनुवृत्तिप्रत्ययहेतुत्वात् सामान्यं
द्रव्यकर्मभ्यो व्यावृत्तिप्रत्ययहेतुत्वाद्विशेषः तथा कर्मत्वं परस्परविशिष्टेषु उत्क्षेपणादिष्वनुवृत्तिप्रत्ययहेतुत्वात् सामान्यं द्रव्यगु
णेभ्यो व्यावृत्तिहेतुत्वाद्विशेषः एवं पृथिवीत्व रूपत्वोत्क्षेपणत्व गोत्व घटत्व पटत्वादीनां प्राण्यप्राणिगतानां अनुवृत्तिव्यावृत्तिप्रत्ययहे ९
तुत्वात् सामान्यविशेषभावः सिद्धः एतानि द्रव्यत्वादीनि प्रभूतविषयत्वात् प्राधान्येन सामान्यानि स्वाश्रय विशेषकत्वात् भक्त्या
विशेषाख्यानीति लक्षणभेदादेषां द्रव्यगुणकर्मभ्यः पदार्थांतरत्वं सिद्धं मत एव नित्यत्वं द्रव्यादिषु वृत्तिनियमात् प्रत्ययभेदाच्च प
रस्परतश्चान्यत्वं प्रत्येकं स्वाश्रयेषु लक्षणाविशेषात् विशेषलक्षणाभावाच्चैकत्वं यद्यप्यपरिच्छिन्नदेशानि सामान्यानि तथाप्युपलक्षणा
नियमात् कारणसामग्रीनियमाच्च स्वविषयसर्वगतानि अंतराले च संयोगसमवायाभावाद् द्रव्याप्रदेशानि इति सामान्यपदार्थः
अंते भवा अंत्याः स्वाश्रयविशेषकत्वात् विशेषा विनाशारंभरहितेषु नित्येषु अण्वाकाशकालदिगात्ममनःसु प्रतिद्रव्यमेकशो वर्तमा
क

ना अत्यंतव्यावृत्तिबुद्धिहेतवो विशेषाः यथास्मदादीनां गवादिषु अश्वादिभ्यस्तुल्याकृतिगुणक्रियावयवसंयोगनिमित्ता प्रत्ययव्यावृत्तिर्दृष्टा
यथा गौः शुक्लः शीघ्रगतिः ककुद्मान् महाघंट इति तथास्मद्विशिष्टानां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्मनःसु चान्यनिमित्ता
संभवात् येभ्यो ऽन्यनिमित्तेभ्यः प्रत्याधारं विलक्षणोयमिति प्रत्ययव्यावृत्तिः देशकालविप्रकर्षे च परमाणौ स एवायमिति प्रत्यभिज्ञानं च भव
तीति यतस्ते ऽन्त्याविशेषा इति यदि पुनरंत्यविशेषमंतरेण योगिनां योगजधर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं च स्यात् ततः किं स्यात् नैवं भव
ति यथा न योगजात् अशुक्ले शुक्लप्रत्ययः संजायते अत्यंतादृष्टे च प्रत्यभिज्ञानं च स्यात् मिथ्याप्रत्ययः स्यात् तथा सविशेषमंतरेण योगिनां
योगजात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं च भवितुमर्हतीति अथांत्यविशेषेषु परमाणुषु कस्मान्न स्वतः प्रत्ययव्यावृत्तिः कल्प्यत इति चेत् तादात्म्या
त् इहातदात्मकेषु अन्यनिमित्तः प्रत्ययो भवति यथा घटादिषु प्रदीपात् न तु प्रदीपे यथा वा श्वमांसादीनां स्वत एवाशुचित्वं तद्योगादन्येषां तथेह
पि तादात्म्यादंत्यविशेषेषु स्वत एव प्रत्ययव्यावृत्तिः तद्योगात् परमाण्वादिष्विति विशेषपदार्थः समाप्तः अयुतसिद्धानामाधार्याधारभूतानां
यः संबंध इहप्रत्ययहेतुः स समवायः द्रव्यगुणकर्मसामान्यविशेषाणां कार्यकारणभूतानां अकार्यकारणभूतानां अयुतसिद्धानां आधार्या
धारभावेनाव्यवस्थितानामिहेति बुद्धिर्यतो भवति यतश्च सर्वगतानामधिगतान्यत्वानाम -- भवः स समवायाख्यः संबंधः कथं यथा इह कुंडे
दधीति प्रत्ययः संबंधे सति दृष्टः तथा इह तंतुषु पटः इह वीरणेषु कटः इह द्रव्ये गुणकर्मणी इह द्रव्यगुणकर्मसु सत्ता इह द्रव्ये द्रव्यत्वं इह गुणे गुणत्वं इह कर्म
णि कर्मत्वं इह नित्यद्रव्ये अंत्याविशेषा इति प्रत्ययदर्शनादस्त्येषां संबंध इति ज्ञायते न चासौ संयोगः संबंधिनामयुतसिद्धत्वात् अन्यतरकर्मज
त्वादिनिमित्तांतराभावात् विभागांतदर्शनादधिकरणाधिकर्तव्ययोरेव भावादिति स च द्रव्यादिभ्यः पदार्थांतरं भाववल्लक्षणभेदात् यथा
भाववद्द्रव्यत्वादीनां स्वाधारेषु आत्मानुरूपप्रत्ययकर्तृत्वात् स्वाश्रयादिभ्यः परस्परतः अर्थांतरभावस्तथा समवायस्यापि यथा पंचसु प
दार्थेषु इहेति प्रत्ययदर्शनात् तेभ्यः पदार्थांतरमिति न च संयोगवन्नानात्वं भाववल्लिंगाविशेषात् विशेषलिंगाभावाच्च तस्माद्भाव
वत्सर्वत्रैकः समवाय इति ननु यद्येकः समवायो द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वादिविशेषणैः सह संबंध एकत्वात् पदार्थधर्मसं
करप्रसंगः न आधाराधेयनियमात् यद्यप्येकः समवायः सर्वत्र स्वतंत्रः तथापि आधाराधेयनियमोस्ति कथं द्रव्येष्वेव द्रव्यत्वं गुणेष्वेव गुण
त्वं कर्मस्वेव कर्मत्वं एवमादिष्वेकः स्यात् अन्वयव्यतिरेकदर्शनात् इहेति समवायनिमित्तस्य ज्ञानस्यान्वयदर्शनात् सर्वत्रैकः समवाय इति गम
यते द्रव्यत्वादिनिमित्तानां व्यतिरेकदर्शनात् प्रतिनियमो ज्ञायते यथा कुंडदध्नोः संयोगैकत्वे भवत्याश्रयाश्रयिभावनियमः तथा द्रव्यत्वा
दीनामपि समवायैकत्वेपि व्यंग्यव्यंजकशक्तिभेदादाधारनियम इति --- इति संबंधानित्यत्वेपि संयोगवदनित्यत्वं भाववदकारणत्वात् यथा प्रमा
णतः कारणानुपलब्धेः नित्यो भाव इत्युक्तं तथा समवायोपीति न ह्यस्य किंचित्कारणं प्रमाणतः उपलभ्यत इति कथं पुनरस्य द्रव्यादिषु स
मवायो वर्तते न संयोगः संभवति तस्य गुणत्वेन द्रव्याश्रितत्वात् नापि समवायस्तस्यैकत्वात् न चान्या वृत्तिरस्तीति न तत्तादात्म्याभाववृत्तित्वात् यथा

[illegible]